रघौ च । ११ । ९ ।

"आशिषं प्रयुयुजे न वाहिनीं
सा हि रक्षणविधौ तयोः क्षमा" ॥)

क्षमता, स्त्री, (क्षमस्य भावः इति । क्षम + तल् ।) योग्यता । सामर्थ्यम् । यथा,—

"श्रुतिर्द्वितीया क्षमता च लिङ्गं
वाक्यं पदान्येव तु संहतानि ।
सा प्रक्रिया या करणस्य काङ्क्षा
स्थानं क्रमो योगबलं समाख्या" ॥

इति भट्टवार्त्तिकम् ॥ क्षमता अर्थप्रकाशनसामर्थ्यम् । यथा । बर्हिर्देवसदनं दामीत्यत्र दामीति पदस्य छेदनप्रकाशनसामर्थ्यात् बर्हिरित्यस्य चास्तृतदर्भप्रकाशनसामर्थ्यात् आस्तृतदर्भच्छेदने समुदायमन्त्रस्य नियोगोऽवगम्यते । इति धर्म्मदीपिका ॥

क्षमा, स्त्री, (क्षमते आत्मोपरिस्थितानां जीवानामपराधं या । क्षम् अच् षित्वादङ् वा ततष्टाप् ।) क्षितिः । (यथा, भट्टिः । ३ । २२ ।

"विभूषणान्युन्मुमुचुः क्षमायां
पेतुर्बभञ्जुर्वलयानि चैव" ॥)

क्षान्तिः । इत्यमरः ।३।३।१२२॥ क्षमालक्षणम् । यथाह, बृहस्पतिः ।

"बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् ।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता" ॥

इत्येकादशीतत्त्वम् । अपि च ।

"आक्रुष्टोऽभिहतो यस्तु नाक्रोशेन्न हनेदपि ।
अदुष्टैर्वाङ्मनःकायैस्तितिक्षुस्तु क्षमा स्मृता" ॥

इति मात्स्ये १२० अध्यायः ॥ अन्यच्च ।

"विभागशीलः सततं क्षमायुक्तो दयात्मकः ।
गृहस्थस्तु क्षमायुक्तो न गृहेण गृही भवेत् ॥
क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः ।
अध्यात्मनिरतज्ञानमेतद्ब्राह्मणलक्षणम् ॥
विगर्हातिक्रमक्षेपहिंसाबन्धवधात्मनाम् ।
अन्यमन्युसमुत्थानां दोषाणां वर्ज्जनं क्षमा" ॥

इति कौर्म्मे १४ अध्यायः ॥ (अपरञ्च यथा, महाभारते । ३ । द्रौपदी-युधिष्ठिरसंवादे । २९ । ३५—।

"अत्राप्युदाहरन्तीमा गाथा नित्यं क्षमावताम् ।
गीताः क्षमावता कृष्णे ! काश्यपेन महात्मना ॥
क्षमा धर्म्मः क्षमा यज्ञः क्षमा वेदाः क्षमा श्रुतम् ।
य एतदेवं जानाति स सर्व्वं क्षन्तुमर्हति ॥
क्षमा ब्रह्म क्षमा सत्यं क्षमा भूतञ्च भावि च ।
क्षमा तपः क्षमा शौचं क्षमयेदं धृतं जगत् ॥
अतियज्ञविदां लोकान् क्षमिणः प्राप्नुवन्ति च ।
अतिब्रह्मविदां लोकानति चापि तपस्विनाम् ॥
अन्ये वै यजुषां लोकाः कर्म्मिणामपरे तथा ।
क्षमावतां ब्रह्मलोके लोकाः परमपूजिताः ॥
क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम् ।
क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमा शमः ॥
तां क्षमामीदृशीं कृष्णे ! कथमस्मद्विधस्त्यजेत् ।
यस्यां ब्रह्म च सत्यञ्च यज्ञा लोकाश्च धिष्ठिताः ॥
क्षन्तव्यमेव सततं पुरुषेण विजानता ।
यदा हि क्षमते सर्व्वं ब्रह्म सम्पद्यते तदा ॥
क्षमावतामयं लोकः परश्चैव क्षमावताम् ।
इह सम्मानमर्हन्ति परत्र च शुभां गतिम् ॥
येषां मन्युर्मनुष्याणां क्षमयाभिहतः सदा ।
तेषां परतरे लोकास्तस्मात् क्षान्तिः परा मता" ॥)

रात्रिः । इति शब्दरत्नावली ॥ * ॥ दुर्गा । इत्यमरटीकायाम् मथुरानाथः ॥ तथा हि ।

"जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते" ॥

इति दुर्गार्च्चातत्त्वम् ॥ अपि च ।

"क्षमा तु श्रीमुखे कार्य्या योगपट्टोत्तरीयका ।
पद्मासनकृताधारा वरदोद्यतपाणिनी ॥
शुक्लमेखलसंयुक्ता प्रशान्ता योगसंस्थिता ।
सितपुष्पोपहारेण सितहोमेन सिद्धिदा" ॥

इति देवीपुराणे संवत्सरदेवताविंशतिविधिः प्रथमः ॥ खदिरः । इति राजनिर्घण्टः ॥ गोपीविशेषः । यथा । राधिकोवाच ।

"मया पूर्व्वञ्च त्वं दृष्टो गोप्या च क्षमया सह ।
सुवेशयुक्तो मालावान् गन्धचन्दनसंयुतः ॥
रत्नभूषितया गन्धचन्दनोक्षितया तया ।
सुखेन मूर्च्छितस्तल्पे पुष्पचन्दनसंयुते ॥
श्लिष्टो निद्रितया सद्यः सुखेन नवसङ्गमात् ।
मया प्रबोधिता सा च भवांश्च स्मरणं कुरु ॥
गृहीतं पीतवस्त्रन्ते मुरली च मनोहरा ।
वनमाला कौस्तुभश्चाप्यमूल्यं रत्नकुण्डलम् ॥
पश्चात् प्रदत्तं प्रेम्णा च सखीनां वचनाद्धरौ ।
लज्जया कृष्णवर्णश्च तेनाप्यद्यापि पश्यतः ॥
क्षमा देहं परित्यज्य लज्जया पृथिवीं गता ।
ततस्तस्याः शरीरञ्च गुणश्रेष्ठं बभूव ह ॥
संविभज्य त्वया दत्तं प्रेम्णा प्ररुदता पुरा ।
किञ्चिद्दत्तं विष्णवे च वैष्णवेभ्यश्च किञ्चन ॥
धर्म्मिष्ठेभ्यश्च धर्म्माय दुर्ब्बलेभ्यश्च किञ्चन ।
तपस्विभ्योऽपि देवेभ्यः पण्डितेभ्यश्च किञ्चन ॥
एतत्ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि" ॥

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ९ अध्यायः ॥ * ॥

क्षमादंशः, पुं, (क्षमां पृथिवीं दंशतीति । दन्श + अच् । तीक्ष्णमूलत्वात् तथात्वम् ।) शिग्रुः । इति राजनिर्घण्टः ॥

क्षमावान्, [त्] त्रि, (क्षमा विद्यते अस्य अस्मिन् वा इति मतुप् मस्य वत्वम् ।) क्षान्तियुक्तः । यथा,

"एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः" ॥

इति गारुडे ११४ अध्यायः ॥

क्षमिता, [ऋ] त्रि, (क्षम् + तृच् ।) क्षमाशीलः । इत्यमरः । ३ । १ । ३१ ॥

क्षमी, [न्] त्रि, (क्षम् + "शमीत्यष्टाभ्यो घिनुण्" । ३।२।१४१। इति घिनुण् ।) क्षमाशीलः । तत्पर्य्यायः । सहिष्णुः २ सहनः ३ क्षान्ता ४ तितिक्षुः ५ क्षमिता ६ । इत्यमरः ।३।१।३१॥ क्षमः ७ शक्तः ८ सहः ९ प्रभूष्णुः १० । इति हेमचन्द्रः ॥ (यथा, भागवते । ९ । १५ । ४० ।

"क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः" ॥)

क्षयः, पुं, (क्षि क्षये । "नन्दिग्रहिपचादिभ्यः" । ३।१।१३४। इति अच् ।) नीतिवेदिनां त्रिवर्गान्तर्गतप्रथमवर्गः । स तु राज्ञामष्टवर्गस्यापचयः । यथा,—

"क्षयः स्थानञ्च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्" ॥

इत्यमरः ३।२।१३४ ॥ नीतिवेदिनां नीतिशास्त्रज्ञानां क्षयादिभिस्त्रिवर्गः अन्येषान्तु धर्म्मकामार्थः पूर्व्वमुक्तः । अष्टवर्गस्यापचयः क्षयः । तस्यैवोपचयो वृद्धिः । तस्य नोपचयो नाप्यपचयः स्थानम् । अष्टवर्गो यथा,—

"कृषिर्व्वणिक्पथो दुर्गं सेतुकुञ्जरबन्धनम् ।
कन्याकरबलादानं सैन्यानाञ्च निवेशनम् ॥
अष्टवर्गः स्मृतो राज्ञां" । इति तट्टीकायां भरतः ॥

लयः । तत्पर्य्यायः । सम्वर्त्तः २ प्रलयः ३ कल्पः ४ कल्पान्तः ५ ॥ अपचयः । तत्पर्य्यायः । क्षिया २ ॥ निलयः । तत्पर्य्यायः गृहशब्दे द्रष्टव्यः ॥ काशरोगविशेषः । तत्पर्य्यायः । यक्ष्मा २ शोषः ३ । इत्यमरः ॥ राजयक्ष्मा ४ रोगराजः ५ गदाग्रणीः ६ उष्मा ७ अतिरोगः ८ रोगाधीशः ९ नृपामयः १० । इति राजनिर्घण्टः ॥

(लक्षणादि चिकित्सितञ्च यथा,—

"शृणुत गुणगरिष्ठा व्याधिघोरं नराणां
भवति रहितचेष्टो वातुलः प्राणिनां वै ।
चिरनिरयकरोऽयं प्राकृतैः कर्म्मपाकै-
रिह परिभवकारी मानुषस्य क्षयोऽयम् ॥
देवानां प्रकरोति भङ्गमथवा भ्रूणस्य सम्पातनं
गोपृथ्वीधरविप्रबालहननञ्चावासविध्वंसनम् ।
योऽयं स्थानविनाशनञ्च कुरुते स्त्रीणां वधो यो नर-
स्तस्यैतैर्गुरुकर्म्मभिः क्षयगदो देहार्थहारी महान् ॥
देवानां दमतो धनञ्च दहतो भ्रूणप्रपातेऽपि च
देवत्वं हरतो विषञ्च ददत आरामकं निघ्नतः ।
तेनासौ नियमेन सम्भवति वै नृणाञ्च तीव्रा रुजा
धातूनां क्षयकारिणी च मनुजस्यात्मापहा दारुणा
क्षयो दशविधश्चैव विज्ञातव्यो भिषग्वरैः ॥
श्रान्त्या भाराद्विषमशयनैर्दीर्घमार्गाक्रमैर्व्वा
भुक्तेर्दोषादतिशयरतेः सेवनाद्वै नरस्य ।
ज्वरेणातिक्रान्तो विषमशयनात् कूटनपरैः
जाता रोगा मनुजवपुषः क्षीणतां संनयन्ति ।
रोगाक्रान्तो विषमशयनात्तस्य मन्दज्वराद्वा ।
श्लेष्मा पित्तं मरुदथशयनैर्यातिदेहक्षयं वा ।
रसरक्तमांसमेदश्चास्थिमज्जानि शुक्रतः ॥
एवं दशविधा ज्ञेयाः क्षया नृणां वपुःसु च ।
पुनश्च लक्षणान्येषां वक्ष्यते शृणु साम्प्रतम् ।
अतिस्वेदातिघर्म्मेण चिन्ताशोषभयादिना ॥
वाताद्यैः सेवितैश्चापि जायते मारुतक्षयः ।
तेन तन्द्राङ्गदाहश्च पिपासारुचिवेपथुः ॥
तमः क्लमो भ्रमश्चैव भवेच्च मारुतक्षये ।
तस्मादिमानि सेव्यानि रसानि पललानि च ॥
रसोनादिककल्कञ्च सेवयेद्वातवर्द्धनम् ।
पित्तक्षयेऽग्निमान्द्यञ्च जायतेऽरुचिजाड्यता ॥
कासहृल्लासशोषश्च जायते मन्दचेष्टता ।
स्वेदाभ्यङ्गाग्नि पानानि दीपनानि प्रयोजयेत् ॥
जाङ्गलानि रसान्नानि सेवयेत् पित्तकृत्क्षये ।
व्यायामे च व्यवाये च रूक्षान्नाहारसेवनैः ॥